# GEETAGOVINDAM

**Combiled by Raman Kizhakkedath ©**

October 21, 2014

**GIITAGOVINDAM**

©October 21, 2014

RAMAN.K.R

All rights reserved.

Published by: Author
Cover Design: Own

**Printed at:**

# Contents


**Contents** **i**

**PREFACE** **1**

**Index** **2**

**1 सामोददामोदरः** **3**

1.1 श्रितकमलाकुच . . . . . . . . 5

1.2 ललितलवंग . . . . . . . . 6

1.3 चन्दनचर्चित . . . . . . . . 8

**2** **10**

2.1 . . . . . . . . 10

2.2 . . . . . . . . 11

**3 मुग्धमधुसूदन** **13**

3.1 मामियम् चलिता . . . . . . . . 13

**4** **16**

4.1 निन्दति चन्दन– . . . . . . . . 16

4.2 स्तनविनिहितमपि– . . . . . . . . 17

**5 साकांक्षपुण्डरीकाक्षः** **20**

5.1 वहति मलय– . . . . . . . . 20

5.2 रतिसुखसारे– . . . . . . . . . . . . . . . . . . . . . . . . . . 21

**6 कुण्ठवैकुण्ठः** **23**

6.1 पश्यति दिशि . . . . . . . . . . . . . . . . . . . . . . . . . . 23

**7 नागरनारायणः** **26**

7.1 कथितसमये– . . . . . . . . . . . . . . . . . . . . . . . . . . 26

# List of Figures

1 राधेश्याम् . . . . . . . . . . . . . . . . . . . . . . . . . . . . 1
2 राधेश्याम् . . . . . . . . . . . . . . . . . . . . . . . . . . . . 2

# List of Tables

# PREFACE



Figure 1: राधेश्याम्

I have started this work of ”Geethagovindam” to make a version in sanskrit font. Started this work on 27.08.2014(Wednessday) and Compleated on 201–—— — (—) . May Srikrishna Bhagavaan & Radhadevi help me to compleat this . Jai Radheshyaam !!

## ध्यानम्

यत्गोपीवदनेन्दुमण्डनमभूत्कस्तूरिकापत्रकं
यल्लक्ष्मीकुचशातकुम्भकलशे व्यागोचमिन्दीवरम्
यन्निर्वाणविधानसाधनविधौ सिद्धाञ्जनं योगिनां
तन्नश्श्यामलमाविरस्तु हृदये कृष्णाभिधानं महः । १ ।

राधामनोरमरमावररासलील-
गानामृतैकभणितं कविराजराजम्
श्रीमाधवार्चनविधावनुरागसद्म-
पद्मावतीप्रियतमं प्रणतोस्मि नित्यम् । २ ।

श्रीगोपलविलासिनी वलयसद्रत्नादिमुग्धाकृति
श्रीराधापतिपादपद्मभजनानन्दाब्धिमग्नोऽनिशम्
लोके सत्कविराज इति यः ख्यातो दयाम्भोनिधिः
तं वन्दे जयदेवसद्गुरुमहं पद्मावतीवल्लभम् । ३ ।



Figure 2: राधेश्याम्

# Chapter 1

# सामोददामोदरः

## प्रथमसर्गः (सामोददामोदरः)

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय
इत्थं नन्दनिदेशितश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ०१

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती
श्रीवासुदेवरतिकेलिकथासमेतं
एतं करोति जयदेवकविः प्रबन्धम् ०२

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धन-
स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ०३

यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम्
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम् ०४

प्रलयपयोधिजले धृतवानसि वेदम्
विहितवहित्रचरित्रमखेदम्
केशव धृतमीनशरीर जय जगदीश हरे ०१०१०१

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे
धरणिधरणकिणचक्रगरिष्ठे
केशव धृतकच्छपरूप जय जगदीश हरे ०१०१०२

वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलङ्ककलेव निमग्ना
केशव धृतसूकररूप जय जगदीश हरे ०१०१०३

तव करकमलवरे नखमद्भुतशृङ्गं
दलितहिरण्यकशिपुतनुभृङ्गम्
केशव धृतनरहरिरूप जय जगदीश हरे ०१०१०४

छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनितजनपावन
केशव धृतवामनरूप जय जगदीश हरे ०१०१०५

क्षत्रियरुधिरमये जगदपगतपापं
स्नपयसि पयसि शमितभवतापम्
केशव धृतभृगुपतिरूप जय जगदीश हरे ०१०१०६

वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम्
केशव धृतरामशरीर जय जगदीश हरे ०१०१०७

वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम्
केशव धृतखलधररूप जय जगदीश हरे ०१०१०८

नन्दसि यज्ञविधेरहह श्रुतिजातं
सदय हृदयदर्शितपशुघातम्
केशव धृतबुद्धशरीर जय जगदीश हरे ०१०१०९

म्लेच्छनिवहनिधने कलयसि करवालं
धूमकेतुमिव किमपि करालम्
केशव धृतकल्किशरीर जय जगदीश हरे ०१०११०

श्रीजयदेवकवेरिदमुदितमुदारं
शृणु सुखदं शुभदं भवसारम्
केशव धृतदशविधरूप जय जगदीश हरे ०१०१११

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः । ५ ।

— — — — — — — — — — —

## 1.1 श्रितकमलाकुच

### प्रथमसर्गः (श्रितकमलाकुच)

श्रितकमलाकुचमण्डल धृतकुण्डल ए
कलितललितवनमाल जय जयदेव हरे ०१०२०१

दिनमणिमण्डलमण्डन भवखण्डन ए
मुनिजनमानसहंसजय जयदेव हरे ०१०२०२

कालियविषधरगञ्जन जनरञ्जन ए
यदुकुलनलिनदिनेश जय जयदेव हरे ०१०२०३

मधुमुरनरकविनाशन गरुडासन ए
सुरकुलकेलिनिदान जय जयदेव हरे ०१०२०४

अमलकमलदललोचन भवमोचन ए
त्रिभुवनवननिधानजय जयदेव हरे ०१०२०५

जनकसुताकृतभूषण जितदूषण ए
समरशमितदशकण्ठ जय जयदेव हरे ०१०२०६

अभिनवजलधरसुन्दर धृतमन्दर ए
श्रीमुखचन्द्रचकोर जय जयदेव हरे ०१०२०७

तव चरणे प्रणता वयमिति भावय ए
कुरु कुशलं प्रणतेषु जय जयदेव हरे ०१०२०८

श्रीजयदेवकवेरिदं कुरुते मुदं ए
मङ्गलमुज्वलगीतं जय जयदेव हरे ०१०२०९

— — — — — — — — — — —

पद्मापयोधरतटीपरिरम्भलग्न-
काश्मीरमुद्रितमुरो मधुसूदनस्य
व्यक्तानुरागमिव खेलदनङ्गखेद-
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः । ६ ।

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम्
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
बलाद्बाधां राधां सरसमिदमूचे सहचरी । ७ ।

— — — — — — — — — — —

## 1.2 ललितलवंग

### प्रथमसर्गः (ललितलवङ्ग)

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे
विहरति हरिरिह सरसवसन्ते
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ०१०३०१

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे
अलिकुलसङ्कुलकुसुमसमूहनिराकुलबकुलकलापे ०१०३०२

मृगमदसौरभरभसवशंवदनवदलमालतमाले
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ०१०३०३

मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे
मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ०१०३०४

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकदन्तुरिताशे ०१०३०५

माधविकापरिमलललिते नवमालिकजातिसुगन्धौ
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ०१०३०६

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ०१०३०७

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारं
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ०१०३०१

— — — — — — — — — — —

दरविदलितमल्लीवल्लिचञ्चत्पराग-
प्रकटितपटवासैर्वासयन् काननानि
इह हि वहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः ।८ ।

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः
नीयन्ते पथिकैः कथंकथमपि ध्यानावधानक्षणः
प्राप्तप्राणसमा समागमरसोल्लासैरमी वासराः ।९ ।

अनेकनारीपरिरम्भसम्भ्रम-
स्फुरन्मनोहारिविलासलालसम्
मुरारिमारादुपदर्शयन्त्यसौ
सखी समक्षं पुनराह राधिकाम् ।९ ।

— — — — — — — — — — —

## 1.3 चन्दनचर्चित

# प्रथमसर्गः (चन्दनचर्चित)

चन्दनचर्चितनीलकलेबर पीतवसनवनमाली
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे ०१०४०१

पीनपयोधरभारभरेण हरिं परिरम्य सरागं
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ०१०४०२

कापि विलासविलोलविलोचनखेलनजनितमनोजं
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ०१०४०३

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ०१०४०४

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले
मञ्जुलवञ्जुकुञ्जगतं विचकर्ष करेण दुकूले ०१०४०५

करतलतालतरलवलयावलिकलितकलस्वनवंशे
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे ०१०४०६

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामां
पश्यति सस्मितचारुपरामपरामनुगच्छति वामाम् ०१०४०७

श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यं
वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम् ०१०४०१

— — — — — — — — — — —

विश्वेषामनुरञ्जने जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्
स्वछन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मदहु मुग्धो हरिः क्रीडति । ११ ।

अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः
किं च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया-
दुन्मीलन्ति कुहूः कुहूरिति कलोत्तल्लः पिकानां गिरः । १२ ।

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवा-
मम्भर्णं परिरम्यनिर्भरमुरः प्रेमान्धया
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुत्-
व्याजादुद्भटचुम्बितस्मितमनोहरी हरिः पातु वः । १३ ।

इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः

— — — — — — — — — — —

# Chapter 2

## द्वितीयमसर्गः (अक्लेशकेशवः)

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम् । १४ ।

### 2.1

सञ्चरदधर–

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशं
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम्
रासे हरिरिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ०२०१०१

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशं
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेषम् ०२०१०२

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभं
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ०२०१०३

विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रं

करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम् ०२०१०४

जलदपटलवलदिन्दुविनिन्दकचन्दनतिलकललाटं
पीनघनस्तनमण्डलमर्दननिर्दयहृदयकपाटम् ०२०१०५

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारं
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् ०२०१०६

विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तं
मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम् ०२०१०७

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपं
हरिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम् ०२०१०८

— — — — — — — — — — —

गणयति गुणग्रामं भामं भ्रमादपि नेहते
वहति च परितोषं दोषं विमुञ्चति दूरतः
युवतिषु वलस्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् । १५ ।

## 2.2

### निभृतनिकुञ्ज–

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तं
चकितविलोकितसकलदिशा रतिरभसरसेन हसन्तम्
सखि हे केशवमथनमुदारं
रमय मया सह मदनमनोरथभावितया सविकारम् ०२०२०१

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम् ०२०२०२

किसलयशयननिवेशितया चिरमुरसि ममैव शयानं

कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ०२०१०३

अलसनिमीलितलोचनया पुलकावलिललितकपोलं
श्रमजलसकलकलेबरया वरमदनमदादतिलोलम् ०२०२०४

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारं
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ०२०२०५

चरणरणितमनुनूपुरया परिपूरितसुरतवितानं
मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम् ०२०२०६

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजं
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ०२०२०७

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं
सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम् ०२०२०८

— — — — — — — — — — —

हस्तस्रस्तविलासवनशमनृजुभ्रूवल्लीमद्वल्लवी-
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डदस्थलम्
मामुद्वीक्ष्य विलक्षितं स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च । १६ ।

दूरालोकस्तोकस्तबकनवकाशोकलतिका-
विकासः कासारोपपवनपवनोऽपि व्यथयति
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति । १७ ।

— — — — — — — — — — —

# Chapter 3

# मुग्धमधुसूदन

तृतीयसर्गः (मुग्धमधुसूदन)

कंसारिरपि संसारवासनाबन्धशृङ्खलाम्
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ।१८ ।

इतस्ततस्तामनुसृत्य राधिका-
मनङ्गबाणव्रणखिन्नमानसः
कृतानुतापः स कलिन्दनन्दिनी-
तटान्तकुञ्जे विषसाद माधवः ।१९ ।

— — — — — — — — — — —

## 3.1 मामियम् चलिता

मामियम् चलिता विलोक्य वृतं वधूनिचयेन
सापराधतया मयापि वारितातिभयेन

हरिहरि हतादरतया गता सा कुपितेव ०३०१०१

किं करिष्यति किं वदिष्यति सा चिरं विरहेण
किं धनेन जनेन मम जीवितेन गृहेण ०३०१०२

चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण ०३०१०३

तामहं हृदि सङ्गतामनिशं भृशं रमयामि
किं वनेऽनुसरामि तामिह किं वृथा विलपामि ०३०१०४

तन्वि खिन्नमसूयया हृदयं तवाकलयामि
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि ०३०१०५

दृश्यसे पुरतो गतागतमेव मे विदधासि
किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि ०३०१०६

क्षम्यतामपरं कदापि तवेदृशं न करोमि
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ०३०१०७

वर्णितं जयदेवकेन हरेरिदं प्रवणेन
किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ०३०१०६

— — — — — — — — — — —

हृदि विसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि । २० ।

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्च्छितजनाघातेन किं पौरुषम्

तस्या एव मृगीदृशो मनसिजप्रेङ्खत्कटाक्षशुक-
श्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्षते । २१ ।

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलं करोतु कबरीभारोऽपि मारोद्यमम्
मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति । २२ ।

तानि स्पर्शसुखानि ते च तरलाः स्निग्धदृशोर्विभ्रम-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्ती गिरां वक्रिमा
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्या लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते । २३ ।

भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि
बाणाः गुणः श्रवणपालिरिति स्मरेण
तस्यामनङ्गजयजङ्गमदेवतायाम्
अस्त्राणि निर्जितजगन्ति किमर्पितानि । २४ ।
**************************************************

# Chapter 4

## चतुर्थःसर्गः (स्निग्धमधुसूदन)

यमुनातीरवानीरकुञ्जे मन्दमास्थितम्
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी २५ ।

— — — — — — — — — — —

### 4.1 निन्दति चन्दन–

निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरं
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्
सा विरहे तव दीना
माधव मनसिजविशिखभयादिव भावनया त्वयि लीना ०४०१०१

अविरलनिपतितमदनशरादिव भवदवनाय विशालं
स्वहृदयमर्मणी वर्म करोति सजलनलिनीदलजालम् ०४०१०२

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ०४०१०३

वहतिच गलितविलोचनजलभरमाननकमलमुदारं
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम् ०४०१०४

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतं
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ०४०१०५

प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ६

ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापं
विलपति हसति विषीदति रोदति चञ्चति मुञ्चति तापम् ०४०१०७

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ०४०१०८

— — — — — — — — — — —

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयञ्शार्दूलविक्रीडितम् । २६ ।

— — — — — — — — — — —

## 4.2 स्तनविनिहितमपि–

स्तनविनिहितमपि हारमुदारं
सा मनुते कृशतनुरतिभारम्

राधिका विरहे तव केशव ०४०२०१

सरसमसृणमपि मलयजपङ्कं
पश्यति विषमिव वपुषि सशङ्कम् ०४०२०२

श्वसितपवनमनुपमपरिणाहं
मदनदहनमिव वहति सदाहम् ०४०२०३

दिशि दिशि किरति सजलकणजालं
नयननलिनमिव विगलितनालम् ०४०२०४

नयनविषयमपि किसलयतल्पं
कलयति विहितहुताशविकल्पम् ०४०२०५

त्यजति न पाणितलेन कपोलं
बालशशिनमिव सायमलोलम् ०४०२०६

हरिरिति हरिरिति जपति सकामं
विरहविहितमरणेव निकामम् ०४०२०७

श्रीजयदेवभणितमिति गीतं
सुखयतु केशवपदमुपनीतम् ०४०२०८

— — — — — — — — — — —

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्
स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा नान्तकः । २७ ।

स्मरातुरां दैवतवैद्यहृद्य

त्वदङ्गसङ्गामृतमात्रसाध्याम्
विमुक्तबाधां कुरुषे न राधा-
मुपेन्द्र वज्रादपि दारुणोऽसि । २८ ।

कन्दर्पज्वरसंज्वरस्तुरतनोराश्चर्यमस्याश्चिरं-
श्चेतस्चन्देअनचन्द्रमःकमलिनीचिन्तासु संताम्यति
किन्तु क्लान्तिवशेन शीतलतनुं त्वामेकमेव प्रियं
ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति । २९ ।

क्षणमपि विरहः पुरा न सेहे
नयननिमीलनखिन्नया यया ते
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम् । ३० ।

— — — — — — — — — — —

इति गीतगोविन्दे स्निग्धमाधवो नाम चतुर्थः सर्गः
**************************************

# Chapter 5

# साकांक्षपुण्डरीकाक्षः

अहमिह निवसामि याहि राधां
अनुनय मद्वचनेन चानयेथाः
इति मधुरिपुणा सखी नियुक्ता । ३१ ।

## 5.1 वहति मलय–

वहति मलयसमीरे मदनमुपनिधाय
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय
तव विरहे वनमाली सखि सीदति ०५०१०१

दहतो शिशिरमयूखे मरणमनुकरोति
पतति मदनविशिखे विलपति विकलतरोऽति ०५०१०२

ध्वनति मधुपसमूहे श्रवणमपिदधाति
मनसि वलितविरहे निशि निशि रुजमुपयाति ०५०१०३

वसति विपिनविताने त्यजति ललितधाम
लुठति धरणिशयने बहु विलपति तव नाम ०५०१०४

भणति कविजयदेवे विरहिविलसितेन
मनसि रभसविभवे हरिरुदयतु सुकृतेन ०५०१०५

— — — — — — — — — — —

पूर्वं यत्र समं त्वया रतिपतेरासादितः सिद्धय-
स्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः
धायंस्त्वामनिशं जपन्नपि तवैवालापमात्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरिरम्भामृतं वाञ्छति । ३२ ।
**************************************

## 5.2 रतिसुखसारे–

रतिसुखसारे गतमभिसारे मदनमनोहरवेषं
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम्
धीरसमीरे यमुनातीरे वसति वने वनमाली ०५०२०१

नाम समेतं कृतसङ्केतं वादयते मृदुवेणुं
बहु मनुते ते तनुसङ्गतपवनचलितमपि रेणुम् ०५०२०२

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानं
रचयति शयनं सचकितनयनं पश्यति तव पन्थानम् ०५०२०३

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलं
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम् ०५०२०४

उरसि मुरारेरुपहितहारे घन इव तरलबलाके
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ०५०२०५

विगलितवसनं परिहृतरसनं घटय जघनमपिधानं
किसलयशयने पङ्कजनयने निधिमिव हर्षनिदानम् ०५०२०६

हरिरभिमानी रजनिरिदानीमियमपि याति विरामं
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ०५०२०७

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयं
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ०५०२०८

— — — — — — — — — — —

विकिरति मुहुः श्वासानाशाः पुरो मुहुरीक्षते
प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते । ३३ ।

त्वद्वाम्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम्
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः । ३४ ।

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः
अन्यार्थं गतयोर्भ्रमान्मिलितयोः सम्भाषणैर्जानतो-
र्दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः । ३५ ।

सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम्
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थाम् । ३६ ।

— — — — — — — — — — —

इति गीतगोविन्देऽभिसारिकावर्णने साकाङ्क्षपुण्डरीकाक्षे नाम पञ्चमः सर्गः
****************************************

# Chapter 6

# कुण्ठवैकुण्ठः

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह । ३७ ।

****************************************

## 6.1 पश्यति दिशि

पश्यति दिशि दिशि रहसि भवन्तं
तदधरमधुरमधूनि पिबन्तम्
नाथ हरे सीदति राधा वासगृहे ०६०१०१

त्वदभिसरणरभसेन वलन्ती
पतति पदानि कियन्ति चलन्ति ०६०१०२

विहितविशदबिसकिसलयवलया
जीवति परमिह तव रतिकलया ०६०१०३

मुहुरवलोकितमण्डनलीला
मधुरिपुरहमिति भावनशीला ०६०१०४

त्वरितमुपैति न कथमभिसारं
हरिरिति वदति सखीमनुवारम् ०६०१०५

श्लिष्यति चुम्बति जलधरकल्पं
हरिरुपगत इति तिमिरमनल्पम् ०६०१०६

भवति विलम्बिनि विगलितलज्जा
विलपति रोदति वासकसज्जा ०६०१०७

श्रीजयदेवकवेरिदमुदितं
रसिकजनं तनुतामतिमुदितम् ०६०१०८

— — — — — — — — — — —

विपुलपुलकपालिः स्फीतसीत्कारमन्त-
र्जनितजडिमकाकुव्याकुलं व्याहरन्ती
तव कितव विधायामन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी । ३८ ।

अङ्गेष्वाभरणं करोति बहुशः पतेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति
इत्याकल्पविकल्पतल्परचनाकङ्कल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति । ३९ ।

— — — — — — — — — — —

इति गीतगोविन्दे वासकसज्जावर्णने कुण्ठवैकुण्ठो नाम षष्ठः

# सर्गः

**************************************

# Chapter 7

# नागरनारायणः

अत्रान्तरे च कुलटाकुलवर्त्मपात-
संजातपातक इव स्फुटलाञ्छनश्रीः
वृन्दावनान्तरमदीपयदंशुजालै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ।४० ।

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा
विरचितविविधविलापं सा परितापं चकारोच्चैः ।४१ ।

****************************************

## 7.1 कथितसमये–

कथितसमयेऽपि हरिरिह न ययौ वनं
मम विफलमिदममलरूपमपि यौवनम्

यामि हे कमिह शरणं सखीजनवचनवञ्चिता ०७०१०१